# Shiva Stuti by Skanda and Sthanakalpana Varnanam by Shiva

# स्कन्दकृता शिवस्तुतिः एवं शिवप्रोक्तं स्थानकल्पनवर्णनम्

## Document Information

Text title : Shiva Stuti by Skanda 2 and Sthanakalpana Varnanam by Shiva

File name : sthAnakalpanavarNanamskandakRRitAshivastutiHevaMshivaproktam.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 27||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 1, 2024

*sanskritdocuments.org*

# स्कन्दकृता शिवस्तुतिः एवं शिवप्रोक्तं स्थानकल्पनवर्णनम्

स्कन्दः -
शशिखण्डशिखण्डमण्डनं विधिमुण्डामलषण्डकण्ठमालम् ।
धृतनागसुकुण्डलं भजे हतचण्डांशुसुतप्रचण्डगर्वकाण्डम् ॥ १०८॥

अखण्डबोधाय सुचण्डदीधितिप्रचण्डनेत्रं कृतताण्डवं सदा ।
भजामि वेतण्डमुखस्तुतं मुदा सुमेरुकोदण्डधराखिलाण्डगम् ॥ १०९॥

सुचण्डबाहुं रणचण्डविक्रमं सुपुण्डरीकोज्ज्वलहारलीलम् ।
तं खण्डपर्शुं प्रणमामि शम्भुमाखण्डलाद्यैरभिवन्दनीयम् ॥ ११०॥

मुनीन्द्रवर्यैरखिलैः समर्चितं करीन्द्रकुम्भस्थितपादपद्मम् ।
गिरीन्द्रजाप्राणसखं भजे शिवं विधीन्द्रनारायणवेदसंस्तुतम् ॥ १११॥

भुजङ्गहारं गलनीलकन्धरं महाजटाभारधरं हरं सदा ।
भजामि गङ्गाधरमीशितारं परात्परं कालहरं महेश्वरम् ॥ ११२॥

वसुधाधरधारकं महेशममरेन्द्रं च सुधाकरोरुचूडम् ।
प्रणमाम्यर्जुनदीप्तिदीधितिं भगवन्तं तमगाधबोधदम् ॥ ११३॥

जगतां मम देवदेव शम्भो जनकस्त्वं भगवन्नुमा जनित्री ।
प्रियपुत्रे मयि दत्तमेतदाद्यं श्रुतिगुह्यं जगतो विमुक्तये ॥ ११४॥

शिवगौरीसंवादे ईश्वरः -
इति स्तुतोऽहं स्कन्देन स्तोत्रवर्येण सत्तमे ।
अवोचं तं तदा स्कन्दं तत्स्तुत्या तोषितोऽम्बिके ॥ ११५॥

ईश्वरः -
स्कन्द त्वत्कृतभक्तिशक्तिभिरहो स्तुत्यं स्तुवन् मां मुदा
युक्तः पातकवर्गजातसहितो मुक्तः स वै पुण्यभाक् ।
तस्मै तद्वयुनं दिशामि च यदा शक्तोऽस्तु तत्वाधिकः ॥ ११६॥

वस त्वं भूधरे स्कन्द सिंहाद्रौ सुरसेविते ।
स्वामिपुष्करिणीतीरे नानावृक्षैकशोभिते ॥ ११७॥

निवासो विहितस्तेऽद्य यावदाभूतसम्प्लवम् ।
मदाज्ञया ययौ स्कन्दो ब्रह्मादिविबुधैः सह ॥ ११८॥

शिवगौरीसंवादे ईश्वरः -
प्रणम्य मां तदा देवि श्रीशैलेशं कृपानिधिम् ।
सम्पूज्य भ्रमराम्बां त्वां नत्वा स्कन्दो गणैर्वृतः ॥ ११९॥

बिल्वैः पद्मैस्तथा पूज्य प्रदक्षिणपुरःसरम् ।
भुजङ्गेनोज्वलच्चञ्च्वा केकारावैर्विराजता ॥ १२०॥

मयूरेणोह्यमानश्च ययौ स्कन्दः सुरैर्वृतः ।
स्वामिपुष्करिणीतीरे सिंहाद्रौ भक्तिभावितः ॥ १२१॥

उवास च तदा स्कन्दो देवीं शक्तिधरस्तदा ।
श्रीशैलेश्वरलिङ्गमेतदमलं मुक्तिप्रदं शाश्वतं
दृष्टं येन समस्तपुण्यफलदं स्वर्गापवर्गप्रदम् ।
तेनेर्वी सकला सुशाम्भववरे दत्तऽखिलैः पातकैः
मुक्तो मत्कथया स्वसुन्दरतरे श्रोत्रे च पात्रीकृते ॥ १२२॥

॥ इति शिवरहस्यान्तर्गते स्कन्दकृता शिवस्तुतिः अथवा शिवप्रोक्तं स्थानकल्पनवर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । भर्गाख्यः पञ्चमांशः । अध्यायः २७॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 27..

Notes:

Having received the requested Gyanopadesha from Shiva, after being redeemed from the curse of Shukracharya; Skanda recites Stuti to Shiva at Shri Shailam. Skanda also eulogises His Mother - Parvati, and receives Shakti (Vel) as blessing. Shiva being pleased thus, blesses Skanda and directs Him to reside in the Simhadri range near Swami Pushkarini. Shiva reiterates to Devi, the merits of worshipping Shri Shaileshwara Linga.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

*Shiva Stuti by Skanda and Sthanakalpana Varnanam by Shiva*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*